International Journal of Sanskrit Research 2019; 5(1): 62-65

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 62-65
© 2019 IJSR
www.anantaajournal.com
Received: 24-11-2018
Accepted: 28-12-2018

**डॉ0 प्रियरंजन मिश्रः**
पूर्वशोधछात्रः,
स्नातकोत्तरव्याकरणविभागः का0 सिं0 द0 सं0 वि0वि0, दरभंगा, बिहार, भारत

**Correspondence**
**डॉ0 प्रियरंजन मिश्रः**
पूर्वशोधछात्रः,
स्नातकोत्तरव्याकरणविभागः का0 सिं0 द0 सं0 वि0वि0, दरभंगा, बिहार, भारत

# शब्दशास्त्रं वाल्मीकिरामायञ्च

**डॉ0 प्रियरंजन मिश्रः**

**प्रस्तावना**

याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्, करणे ल्युट् प्रत्ययः। सामान्यतः शब्दानां रूपसिद्धिरेव व्याकरणस्य महत्त्वम्। शब्दानुशासनं व्याकरणस्य प्रधानतमं प्रयोजनम् अत एव महाभाष्यकारेण प्रतिज्ञावाक्यरूपं शब्दानुशासनमेव प्रदर्शितम्। को नाम शब्दानुशासनम्? तत्र एवं व्युत्पत्तिः – शब्द्येते निग्रहानुग्रहौ क्रियते इति शब्दः, अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते अनेन इत्यनुशासनम्। शब्दानामनुशासनम् अत्र ''कर्तृकर्मणोः कृति'' [1] इति सूत्रेण कृद्योगे कर्मणि षष्ठी विभक्तिर्भवति। ''कृद्योगाच्च षष्ठी समस्यत इति वाच्यम्'' इति वार्तिकेन इध्मप्रवश्चनादिवत् षष्ठीसमासः, तेन शब्दकर्मकम् अनुशासनं शब्दानुशासनमित्यस्यार्थः सिध्यति। तत्र कीदृशः शब्दः इति परिप्रश्ने महाभाष्यकारः स्वयमेव अग्रे समादधाति–लौकिकानां वैदिकानाञ्च। अतः लौकिकानां वैदिकानाञ्च शब्दानाम् अनुशासनं भवति। अत एव व्याकरणस्य इदमन्वर्थं नाम, यतो हि व्याकरणस्य यत् कार्यं तदेव कार्यं शब्दानुशासनस्य।

प्रक्रियाग्रन्थेषु भट्टोजिदीक्षितस्य स्थानं महत्त्वपूर्णं विद्यते। शाब्दिकः दीक्षितमहोदयो महाराष्ट्रियब्राह्मण आसीत् । अस्य पितुर्नाम लक्ष्मीधरभट्टः, भ्राता च रौजिभट्टः, पुत्रौ भानुजिदीक्षित– वीरेश्वरदीक्षितौ च आस्ताम्। अस्य गुरूः श्रीनृसिंह–तनूजः शेषकृष्णः। यतोऽयं समग्रव्याकरणशास्त्रमध्यैष्ट। भट्टोजिदीक्षितः स्वयमपि अष्टाध्यायीमधिकृत्यलिखिते शब्दकौस्तुभग्रन्थे श्रीमदप्पय्यदीक्षिताय नमश्चक्रे। तद्यथातन्त्रसिद्धान्तदीपिकायां श्रीमदप्पय्य – दीक्षितेन्द्रानात्मनोगुरूनेवं व्याहरति–

''अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।
यत् कृतिबोधाबोधौ विद्वद–विद्वद् विभाजकोपाश्री।।''

गुरूकृपातो व्याकरणशास्त्रे दीक्षितः श्रीभट्टोजिदीक्षितः प्रणिनाय बहून ग्रन्थान्। तेषां नामानि–
शब्दकौस्तुभं व्याकरणविषयसंबंधी वर्तते। तत्त्वकौस्तुभं वेदान्त – विषयसंबंधी विद्यते। तन्त्रसिद्धान्तदीपिकां पूर्वमीमांसाविषयिणी विद्यते। वैयाकरणसिद्धान्तकारिकाः सिद्धान्तकौमुदी– साम्प्रतिकेषु प्रक्रियाग्रन्थेषु महोच्यं स्थानं विभर्ति। सिद्धान्तकौमुद्या उत्तरकृदन्तस्यान्तिमे भागे –

''इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम्।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे।।''

प्रौढ़मनोरमा इत्यादयाः सन्ति। वेदभाष्यसारस्य रचना ऋग्वेदस्य प्रथमाध्यायमधिकृत्य कृता वाभाति।तैत्तिरीयसन्ध्याभाष्यम् तिथिनिर्णस्य–अन्तिमे भागे होलिकादाहावसरेऽश्लील – पदानां प्रयोगाः समर्थिता नेत्रपथातिपी भवन्ति।

भट्टोजिदीक्षितस्यकालनिर्धारणविषये विद्वांसः पृथक् पृथक् मतमनुसरन्ति। वार्डमहालिंशास्त्रिमहोदयमतेन अप्पयदीक्षितो भट्टोजिदीक्षितस्य गुरूरासीत्। शिवानन्दयोगीन्द्रनाम्ना सन्यासिना अप्पय्यदीक्षितेन्द्र– विजयनामके ग्रन्थेऽप्यदीक्षितस्य जन्मकालनिर्देशः कृतः।[2] तस्मादिदं ज्ञायते यद् अप्पय्यदीक्षितः 4654 कलौ (1553 खिष्टाब्दे) जनिमापन्नः। शिवानन्दयोगी – न्द्रेणाय– मेबार्थोऽप्पयदीक्षित प्रणीतस्य आत्मापर्णस्तुति ग्रन्थस्य टीकायां निरूपितः। परं नीलकण्ठविरचिते शिवलीलार्णवेऽप्पयदीक्षितस्य काल – विषयेऽन्यदेव मतमनुसृतम्। तत्र अप्पयदीक्षित आयुषो द्वासप्ततिं (72) प्राप्य शतं प्रबन्धांश्चक्रे [3] इति निर्देशः अप्पयदीक्षितश्च चिन्नतिम्मचिन्न बोम्मवौटपति – देवादिराजेभ्यो लब्धाश्रयः पण्डिता आसीत्। एतेषां प्रमाणामपि राज्ञां प्रशासनकालः 1542, खिष्टाब्दवर्षमारभ्य 1593 वर्षपर्यन्तं वर्तते। यदा च अप्पयदीक्षितो द्वासप्ततिवर्षमवाप्तः, तदा वर्षपर्यन्तं वर्तते। यदा च अप्पयदीक्षितो द्वासप्ततिवर्षमवाप्तः, तदा वौटपतिदेवोऽप्पय–दीक्षितस्यान्तिम आश्रयदाता वभूव। अस्य वौटपतिदेवस्य शासनसमये भट्टोजिदीक्षितो वाराणसीतः समागत्य अप्पयदीक्षिताद् विद्यामुपासितवान्पू। वौटपतिदेवस्य निर्देशो भट्टोजिदीक्षितेन तत्त्वकौस्तुभाख्ये ग्रन्थे [4] कृतो वर्तते। तद्वदेव भट्टौजिदीक्षितेन तन्त्रसिद्धा – न्तदीपिकायामप्पय्यदीक्षितस्य वन्दनं कृतं विद्यते।[5] अतश्च स (अप्पयदीक्षितः) भट्टोजिदीक्षितस्य गुरू इति ज्ञायते। एतत्सर्वं विचार्य महालिं शास्त्रिणोऽप्पयदीक्षितस्य कालं 1520 तः 1593 खिष्टाब्दपर्यन्तनिर्धारयन्ति। परं प्रो0 पी0वी0 काणेमहोदया [6] महालिंशास्त्रिणामिदं मतं नोररीकृर्वन्ति। ते एवं प्रतिपादयन्ति यद् अप्पयदीक्षितस्य नाम्ना उल्लेखं कुर्वाणः [7] कदाचिद् अप्पयदीक्षितस्योत्तरकाले उत्कीर्ण स्यात्; तद्वदेव शिवानन्दयोगीन्द्र– प्रदत्तमप्पयदीक्षितस्य जन्मपत्रमुत्तरवर्तिकाले विलिखितं भवेत्। अतो महालिंशास्त्रिभिः कृतोऽप्ययदीक्षितस्य कालनिर्णयः केवल– शिलालेखनामाधिष्ठितः संशीतिं भजते।

वीणातत्त्वज्ञसंख्यालसित कलिसमायाक् प्रमातीचवर्षे, कन्यामासेऽथ कृष्णप्रथमतिथियुत्तेऽप्युत्तरप्रोष्ठपादये। कन्यालग्नेऽद्रिकन्यापतिरमित दयाशेव – धिवैदिकेषु, श्रीदेव्यै प्राग्यथोक्तं समजनि हि समीपेऽत्र काञ्चीनगर्भाम्।

प्रौढमनोरमा–स्वयं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याः व्याख्यामयी ''प्रौढ़–मनोरमा'' नाम्नी टीका लिखिता। या च नाम्नैव ज्ञातुं शक्यते यत् प्रौढ़ानां मनसां रमणीया इयं प्रौढमनोरमा, यत्र शास्त्रार्थपद्धत्या प्रक्रिया विद्यते (नात्र तस्याः विवरणकरणमपेक्षितम्)।

तस्या प्रौढमनोरमायाः टीकाकठिनतमं शब्दरत्नम्। यद् भट्टोजिदीक्षितस्य पौत्रेण महावैयाकरणस्य नागेशभट्टस्य गुरूणा श्रीहरिदीक्षितेन शब्दरत्नाम्नी टीका कृता। इयं टीका लौकिकोक्तिवत् ''सूर्यस्य पर्यायवाची मार्तण्ड''– वत् विद्यते। शब्दरत्नसहितायाः प्रौढमनोरमायाः उपरि महामहोपाध्याय पायुगुण्डेन भावप्रकाशनाम्नी भैरवी व्याख्या कृता। अयं महामहोपाध्यायः नागेशभट्टस्य शिष्यः आसीदिति कथ्यते।

श्री भट्टोजिदीक्षित महोदयेन स्वयं सिद्धांतकौमुद्याः व्याख्या प्रणीता, या ''प्रौढमनोरमा'' इति नाम्ना प्रसिद्धाऽस्ति। अत्र तेन प्रक्रिया कौमुद्यास्तट्टीकानाञ्च स्थाने स्थाने खण्डनं विहितम्। श्रीभट्टोजिदीक्षितेन यथोत्तरं मुनीनां प्रामाण्यम्' इत्यत्र महद्बलं प्रदत्तमस्ति।

श्रीभट्टोजिदीक्षितेन प्रणीतायाः 'प्रोढमनोरमायाः संवत् 1708 वैक्रमाब्दस्यैको हस्तलेखः पूनास्थ– भण्डारकर–प्राच्यविद्याप्रतिष्ठाने वर्तते।

प्रौढमनोरमायां श्री भट्टोजिदीक्षित–पौत्रेण श्रीहरिदीक्षितेन 'वृहच्छब्दरत्न ''नाम्नी'' लघुशब्दरत्न'' नाम्नी च व्याख्या प्रणीता। तत्र लघुशब्दरत्नं मुद्रितम् सर्वत्र प्राप्यते। परं वृहच्छब्दरत्नमिदानीं यावदमुद्रितमेवास्ति। केचन विद्वांसो मन्यन्ते यन्नागेशभट्ट एव लघुशब्दरत्नं स्वयं विलिख्य स्वगुरोर्नाम्ना प्रकाशितवान्। लघुशब्दरत्नेऽप्यनेकैर्विद्वद्भिः टीका विलिखिताः।

सं0 1550–1600 वैक्रमाब्दमध्यकाल– समुत्पन्नेन श्रीवामनेन्द्रसरस्वती शिष्येण श्रीज्ञानेन्द्र सरस्वती महोदयेन सिद्धान्त कौमुद्यां 'तत्वबोधिनी' नाम्नी व्याख्या प्रणीता।

सं0 1600–1675 वैक्रमाब्दमध्यकालिकेन श्रीज्ञानेन्द्र–सरस्वती शिष्येण श्रीनीलकण्ठ वाजपेयि–महोदयेन तत्त्वबोधिन्याः ''गूढार्थ दीपिका' नाम्नी टीका, सिद्धांतकौमुद्याश्च सुखबोधिनी नाम्नी व्याख्या प्रणीता।

सं01688–1720 वैक्रमाब्दमध्यकालिकेन तात्कालिकोत्कृष्ट– शैव– विदुषा श्रीमधुकर त्रिपाठिनस्तनुजेन श्री रामानन्द नामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः ''तत्त्वदीपिका'' नाम्नी टीका प्रणीता।

सा सम्प्रति हलन्त–स्त्रीलिङगं यावदुपलभ्यते। प्रायेण सं0 1715 वैक्रमाब्दीयेन श्री–वेड्कटाद्रि भट्टात्मज श्री तिरुमलभट्टतनूजेन श्रीरामकृष्णभट्ट – नामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः 'रत्नाकरनाम्नी टीका प्रणीता अस्याः हस्तलेखः तञ्जौर राजकीय पुस्तकालये, जम्मूस्थ रघुनाथ मन्दिर पुस्तकालये च वर्तते। जम्मूस्थ हस्तलेखेष्वेकस्य लेखनकालः सं01744 वर्तते।[8] भण्डारकर प्राच्य विद्या प्रतिष्ठान पूना–संग्रह टीकाग्रन्थे–अस्याः चत्वारो हस्तलेखाः प्राप्यन्ते।[9]

सं0 1730–1820 वैक्रमाब्द मध्यकालिकेन श्री नागेशभट्टनामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः वृहच्छब्देन्दुशेखर' 'लघुशब्देन्दुशेखर इत्याख्ये द्वे टीके प्रणीते। लघुशब्देन्दुशेखरेऽनेकाष्टीकाः विलिखिताः। सं0 1745 वैक्रमाब्दीयेन चोलदेशान्तर्गत करण्डमाणिक्य ग्राम–निवासिना श्री रङगनाथ यज्वा नामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः 'पूर्णिमा' नाम्नी टीका प्रणीता।[10] सं0 1740–1800 वैक्रमाब्दमध्य कालिकेन चोल तञ्जोर–देशस्य भोसल वंशीय शाहजी शरभजी तुक्कोजीत्यारव्य–त्रयाणं राज्ञां मन्त्रिणः विदुषाः सार्वभौम आनन्दरायस्याऽध्वर्युणा श्रीमहादेव वाजपेयिसूनुना श्री विश्वेश्वर वाजपेयि शिष्येण श्री वासुदेव वाजपेयि नामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः

''बालमनोरमा'' नाम्नी टीका प्रणीता। टीकेयमतीवसरलेति कृत्वा छात्राणां कृतेऽतीवोपयोगिनी।

श्री देवीदत्तात्मज श्रीरामसेवकपुत्रेण श्री कृष्णमित्र नामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः 'रत्नार्णव' नाम्नी टीका प्रणीता, यस्य उल्लेखः श्री आर्फ्रेख्ट महोदयेन स्वकीये वृहत्सूची पत्रे विहितः । सं0 1817 वैक्रमाब्दीयेन शेषकुलोत्पन्नेन श्री नागोराज पण्डितानां पुत्रेण श्रीरामचन्द्र पण्डितेन सिद्धान्त कौमुद्याः स्वरप्रक्रियाशंस्य व्याख्याप्रणीता। जम्मूस्थ रधुनाथमन्दिर पुस्तकालयेउपलब्धे हस्तलेखेऽन्तिमे भागेऽधोलिखितः पाठ उपलभ्यते –'इति शेषकुलोत्पन्नेन नागोजि पण्डितानां पुत्रेण रामचन्द्रपण्डितेन विरचिता स्वरप्रक्रियाव्याख्या समाप्ता। सं0 1847 वैशाखमासे शुक्लपक्षे वार शनैश्चरः। प्रायेन सं0 1700 वैक्रमाब्दीयेन श्री वेङकटाद्रि पुत्रेण श्री तिरुमल्लद्वादशाहयाजि– महोदयेन सिद्धान्तकौमुद्याः 'सुमनोरमा ' नाम्नी टीका प्रणीता । सुमनोरमाया एको हस्तलेखस्तञ्जौरपुस्तकालये उपलभ्यते ।[11]

वाल्मीकिरामायणं सप्तकाण्डात्मकं विद्यते। तत्र शब्दशास्त्रदृष्ट्या वाल्मीकिशब्दस्य व्युत्पत्तिः वाल्मीकस्यापत्यम् इति विग्रहे 'अत इञ्' इत्यनेन अपत्यार्थक इञि प्रत्यये सति आदेरचो वृद्धौ सत्यां वाल्मीकिशब्दः निष्पन्नो भवति। तत्र वाल्मीकिशब्दो द्वयर्थकः एकोऽर्थः कीटः स च बभ्रीलपरपर्यायः द्वितीयोऽर्थस्तु ऋषिः। तेन वाल्मीकस्य ऋषेरपत्त्यं वाल्मीकिः। व्याकरणस्य एकस्मिन् सूत्रे महादीनां पाठ्क्रमे केषाञ्चित् ऋषीणां नामानि पठितानि यथा राङिकमनि काठेरणि सौमित्रि शैशिरि आसुत दैवशर्मी श्रौति अहिंसि आमित्रि व्याडि वैजि आध्यशिव आन्नृशासि शौंगि अग्निशर्मि भौति वाटाटकि वाल्मीकि इत्यादीनि सर्वाणि नामानि ऋषिवाचकानि सन्ति। तस्मात् वाल्मीकिः ऋषिखेः नान्यः।

एतस्य वाल्मीकिरामायणस्य प्रतिकाण्डं पुष्पिकायाम् 'इत्यार्षे वाल्मीकीयरामायणे बालकाण्डे प्रथमः सर्गः' इत्यस्य उल्लेखः कृतः। आर्षत्वञ्च ऋषित्वादेव संगच्छते। ऋषि च मन्त्रद्रष्टा भवति। वाल्मीकिरामायणं सप्तकाण्डात्मकमिति जगति सर्वत्र प्रथितम्। तत्र बालकाण्डे–

चारित्रमेव च को युक्तः सर्वभूतेषु को हतः।
विद्वान्कः कः समर्थश्च काश्चैकप्रियदर्शनः।।

चरित्रमेव चारित्रम्। स्वार्थिकोऽण्। वृत्तसंपदनेनोच्यते। सर्वभूतेषु सर्वप्राणिषु मध्ये कः पुमान्हितः ऐहिकामुष्मिकवहोऽशत्रुभ्यः। यन्तु सर्वप्राणिषु सापराश्रिष्वपि हितकरणशील इति व्याचक्षते तत्तु हितयोगे चतुर्थ्यापत्तेरयुक्तम्। विद्वानात्मानात्मसकलपदार्थतत्त्वज्ञः। समर्थो लौकिक व्यवहारे प्रजारञ्जनादौ चातुर्य सामर्थ्य तद्वान्। कामाधिकसौन्दर्यवत्त्वेन नित्यसुख रूपत्वेन चैकप्रियं केवलप्रियं दुःख संभिन्नप्रियत्वद्दर्शनं यस्य सः। यत्त्वेकं प्रति प्रियं दर्शनं यस्येति तदयुक्तम्। सर्वप्रियत्वस्य प्रतिपादनम् एकोऽद्वितीयः स चासौ प्रियदर्शनश्चेत्यर्थ इति तीर्थः।

स तत्र न्यवसभ्राता सह सत्कारसत्कृतः।
मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः।।

रामभक्तो भरतः कथं तं विहाय मातुलकुले न्यवसादित्यपेक्षायां रामाभिमानविषयभूतशत्रुघ्नसहवासादित्याह स इति। सः भरतः तत्र मातुलगृहे अश्वपतिना मातुलेन युधाजिता सत्कारसत्कृतः जात्यश्वप्रदानादिना पूजितोऽपि पुत्रस्नेहेन पुत्रविषयस्नेहतुल्यस्नेहेन ललितः विशिष्ट भोजनाच्छादनाभरणप्रदानादिभिरूप ललितोऽपि सन् भ्राता शत्रुघ्नेन सह न्यवसत् भ्रातृस्नेहेनैव तत्र स्थितः न तु मातुलोपलालनमात्रादितिभावः यद्वा सः शत्रुघ्न भ्रात्रा इति तृतीया। अश्वपतिः स्वस्रीयादपि शत्रुघ्नमतिशयेन ललितवानित्यर्थः। अथवा भ्रात्रा सह न्यवसत् रामेण सह न्यवसत् सदा रामचिन्तया तेन सह वर्तमान इव स्थित इत्यर्थः।

प्रविश्य तु महारण्यं दण्डकारण्य मात्मवान्।
रामो ददर्श दुर्धर्षस्तावसाश्रममण्डलम्।।

अथ ऋषिदर्शितवर्त्मना रामस्य दण्डकारण्य प्रवेशमाह प्रविश्येति। ऋषि–दर्शित वर्त्मनेति शेषः, दण्डकारण्यं तत्संज्ञकं महारण्यं दण्डकस्य राज्ञो देशः शुक्रशावनशादरण्व्यमभूत। ततः प्रभृति दण्डकारण्य संज्ञा तस्य। प्रायेण महाराष्ट्रदेशोऽयम्। आत्मवान्स्वायत्तचितः, दुर्धर्षो द्विषि रप्रधृष्यः। 'दुर्धर्षम्' इति पाठे रक्षो युतत्त्वादशक्यप्रवेशमित्यर्थः, मण्डलं समूहः।

स तां पुष्करिणीं गत्वा पद्मोत्पलक्षषाकुलम्।
रामः सैमित्रिसहितो विललापा कुलेन्द्रियः।।

स विराधादिवधेन प्रसिद्धपराक्रमः पम्पादर्शनोद्दीपितकामो वा तां सुग्रीवाधिष्ठितर्ध्यमूकसमीपगां पुष्करिणीं पम्पाख्यं मतांख्यं वा सरोविशेषम्। विललाप पर्यदेवयत्।

ततो रावणनीतायाः सीतायाः शत्रुकर्षणः।
इयेष पदमन्वेष्टुं चारणा चरिते पथि।।

अथ समुद्रकुर्दनमिच्छति स्म–तत इति। ततः शत्रुकर्षणो हनुमान्रावणनीताया रावणहृतायाः सीतायाः पदमवस्थितिस्थानमन्वेष्टुं चारणैर्देवजाति विशेषैराचरिते क्रियमाण संचारे पथ्याकाशमार्गे भ्रमनायेयेष।

श्रुत्वा हनूमतो वाक्यं यथावदभिभाषितम।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत्।।

एवं हनुमतः सकाशात्सीतावृत्तान्तं श्रुत्वा कृतकार्ये भृत्ये स्वामिन उचितां वृत्तिं लोकेभ्य उपदेष्टुं हनुमन्तमस्तौषी दित्याह श्रुत्वेति। उत्तरं प्रियश्रवणोत्तर कालयोग्यम्।

प्राप्तराज्यस्य रामस्य राक्षसानां बुधे कृते।

आजरमुर्मुनयः सर्वे राघवं प्रतिनन्दितुम।।

अथ रावणस्य ब्रह्मानुग्रह जबलवैभवतिपादनद्वारा तजेतृत्वेन भगवति पराक्रमातिशयं प्रतिपादयितुं त्वदत्तवैभवं त्वयैवोपसंहृतमिति भगवान्महिमानं च स्तोतुमृपय आगता इत्याह प्राप्तेति राक्षसानां वधे कृतेऽन्तरं प्राप्तराज्यस्य प्राप्तराज्याभिषेकस्य समीपं मुनय आजग्मुः। किमर्थम्। राघवं प्रतिनन्दितुम्। तद्वैभवमभिष्टोतुमित्यर्थः।

**सन्दर्भ**


1. पाणिनीयसूत्रम्– 2/3/65।
2. Shastri YM. Appayya Dikshita's Age', Jor (Madras), Vol. ii, Parts-iii-iv, p. 225.
3. Ibid, p. 227
   कालेन शम्भुः किल तावतापि कलाश्चतुष्षिटमिताः प्राणिन्ये।
   द्वासप्ततिं प्राप्य समाः प्रबन्धान् शतं व्यवादप्ययदीक्षितेन्द्रः।।
4. द्र0 युधिष्ठिर मीमांसकः, सं0 व्या0 शा0 इति0, भाग–1,
   प्रथम संस्करणम, पृ.–352, 356।
5. Shastri YM. Jor (Madras), Vol. ii, Parts-iii-iv, p. 233.
   अप्ययदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।
   यत्कृतिबोधाबोधौ विद्वद् विद्वद्विभाजकोपाधी।
6. Kane PV. History of Sanskrit Poetics, 1961, 319-320.
7. शिलालेखविषये विस्तरेण द्र0– Y.M. SHASTRI" JOR (Madras), Vol. ii, Parts-iii-iv, p. 225-237.
8. जम्मू रघुनाथ मन्दिर पुस्तकालय सूचीपत्र पृ0 501
9. भण्डारकर प्राच्यविद्या प्रतिष्ठान पूना, व्याकरण विषयक सूची पत्र नं0–170, 171, 173।
10. मद्रास राजकीय हस्तलेख पुस्तकालय सूची पत्र भाग 1, खण्ड–1 ब खण्ड पृ0 808 ग्रन्थाङक 634।
11. चौखमबा संस्कृत सीरीज काशी से0 सं0 1911 में प्रकाशित प्रौढमनोरमा भाग 3 के अन्त में मुद्रित प्रौढ़मनोरमाखण्डन, पृ0 –1